गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः, ६ इन्द्रासोमौ,८ (पूर्वाऽर्धर्चस्य) सरस्वती, ९ बृहस्पतिः, ११ मरुतः। त्रिष्टुप्, ११ जगती

**ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः।**
**अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम्॥ २.०३०.०१**

ऋतम्- प्रकृतिनियतिभूतसत्यम्। कृण्वते- कुर्वते। देवाय- द्योतनाय। सवित्रे- आत्मसूर्याय। अहिघ्ने- वृत्रघ्नाय। इन्द्राय- ईशनाधिदैवताय। आपः- मूलशक्तिधाराः सरन्ति। न रमन्ते- न विरमन्ति। अपाम्- जीवोदकानाम्। अक्तुः- श्रोतः। अहरहः- प्रत्यहम्। याति- सरति। आसाम्- अपाम्। प्रथमः। सर्गः। कियत्या- कस्मिन् कालेऽभूत्। कस्मिन्नपि काले न। ता नित्या इति भावः ॥१ ॥

**यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच।**
**पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम्॥ २.०३०.०२**

यः। वृत्राय- मूलशक्तिधाराणां वा चिद्रश्मीनां वा आवारकाय। सिनम्- तत्पुष्ट्यर्थं। अत्र- अस्मिन् स्थाने। सिनम्- अन्नम्। आभरिष्यत्- आहरत्। तम्- तस्य दण्डं प्रति। जनित्री- अदितिरखण्डप्रकृतिर्माता। विदुषे- ज्ञानिने इन्द्राय ईशनाधिदैवताय। उवाच- अवदत्। पथः- मार्गान्। रदन्तीः- लिखन्त्यः। धुनयः- आपो मूलशक्तिधाराः। अनु जोषम्- यथाकामम्। अस्मै- एतस्मै। दिवेदिवे- प्रतिदिनम्। अर्थं- पुरुषार्थं प्रति। यन्ति- सरन्ति ॥२ ॥

**ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार।**
**मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः॥ २.०३०.०३**

Dr. Ranganji
WEBOLIM

अन्तरिक्षे अधि- द्यावापृथिव्योरन्तराल इत्याधिभौतिके। प्राणमयकोश इत्यध्यात्मिके। ऊर्ध्वः- उत्कृष्टः। हि- खलु। अस्थात्- तस्थौ। अध- अतः। वृत्राय- वृष्ट्यावरणायेत्याधिभौतिके। मूलशक्तिधाराणामावरणायेत्याध्यात्मिके। वधम्- स्वप्रहरणम्। प्र- प्रकर्षेण। जभार- आजहार। मिहं वसानः- सेचनगुणः। ईम्- एनम्। हि- खलु। उप अदुद्रोत्- उपागमत्। तिग्मायुधः- तीक्ष्णप्रहरणः। इन्द्रः- परमेश्वरः। शत्रुम्- रिपुम्। अजयत्॥३॥

**बृह॑स्पते॒ तपु॒षाश्ने॑व विध्य॒ वृक॑द्वरसो॒ असु॑रस्य वी॒रान्।**
**यथा॑ ज॒घन्थ॑ धृष॒ता पु॒रा चि॑दे॒वा ज॑हि॒ शत्रु॑म॒स्माक॑मिन्द्र॥ २.०३०.०४**

बृहस्पते- मेधामन्त्राधिदैवत। तपुषा- तापकेन। अश्नेव- अशनिना वज्रेण। वृकद्वरसः- संवृतद्वारस्य। असुरस्य- प्राणापहारकस्य रक्षसः। वीरान्- सैनिकान्। विध्य- नाशय। धृषता- धर्षकेण वज्रेण। यथा। पुरा- पुरातनकाले। जघन्थ- हतवान्। एव- तथा। इन्द्र- परमेश्वर। अस्माकम्- नः। शत्रुम्- रिपुम्। जहि- नाशय॥४॥

**अव॑ क्षिप दि॒वो अश्मा॑नमु॒च्चा येन॒ शत्रुं॑ मन्दसा॒नो नि॒जूर्वाः॑।**
**तो॒कस्य॑ सा॒तौ तन॑यस्य॒ भूरे॑र॒स्माँ अ॒र्धं कृ॑णुतादिन्द्र॒ गोना॑म्॥ २.०३०.०५**

उच्चा- उच्चैर्वर्तमानस्त्वम्। दिवः- नभसः। अश्मानम्- वज्रम्। अव क्षिप- अधः पातय। येन। मन्दसानः- हृष्टः सन्। शत्रुम्- रिपुम्। निजूर्वाः- नाशितवानसि। भूरेः तोकस्य तनयस्य सातौ- प्रभूतसन्ततिलाभे। इन्द्र- परमेश्वर। गोनाम्- विद्यानाम्। अर्धं- समृद्धिम्। कृणुतात्- कुरु॥५॥

**प्र हि क्रतुं॑ वृ॒हथो॒ यं व॑नु॒थो र॒ध्रस्य॑ स्थो॒ यज॑मानस्य चो॒दौ।**
**इन्द्रा॑सोमा यु॒वम॒स्माँ अ॑विष्टम॒स्मिन्भ॒यस्थे॑ कृणुतमु लो॒कम्॥ २.०३०.०६**

यम्। वनुथः- सम्भजथः। तस्य। क्रतुम्- सङ्कल्पम्। प्र- प्रकर्षेण। हि- खलु। वृहथः- उद्यच्छथः। रध्रस्य- समृद्धिकारकस्य। यजमानस्य- उपासकस्य। चोदौ- चोदकौ। स्थः- भवथः। इन्द्रसोमा-

Dr.Ranganji
WEBOLIM

हे इन्द्रासोमौ। इन्द्र ईशनाधिदेवता। सोमो रसाधिदेवता। युवम्- युवाम्। अस्मान्- नः। अविष्टम्- रक्षतम्। अस्मिन्। भयस्थे- भयस्थाने। लोकम्। कृणुतम्- अभीतं कुरुतम्॥६॥

**न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम्।**

**यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत्॥ २.०३०.०७**

मा- माम्। न। तमत्- ग्लानिं गमयतु। तमु ग्लानौ। न। श्रमत्- श्रान्तिं गमयतु। उत- अपि च। न। तन्द्रत्- नालस्यं प्रापयतु। सोमम्- रसम्। मा। सुनोत- निष्पादयत। इति। न। वोचाम- ब्रवाम। यः। मे- माम्। पृणात्- पूरयति। यः। ददत्- ददाति। यः। निबोधात्- अवगच्छति। यः। सुन्वन्तम्- निष्पादकम्। मा- माम्। गोभिः- चिद्रश्मिभिः। उप आयत्- आगच्छति। स इन्द्र अनुगृह्णातु॥७॥

**सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून्।**

**त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम्॥ २.०३०.०८**

सरस्वति- रसचोदनाधिदैवते। त्वम्। अस्मान्- नः। आविड्ढि- रक्ष। मरुत्वती- प्राणवती। धृषती- धर्षणशीला। शत्रून्- रिपून्। जेषि- जयसि। शर्धन्तम्- प्रसहनशीलम्। शृधु प्रसहने। तविषीयमाणम्- बलवन्तम्। शण्डिकानाम्- रोगानाम्। शण्डि रुजायाम्। वृषभम्- वर्षकम्। इन्द्रः- ईशनाधिदेवता। हन्ति- बाधते॥८॥

**यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य।**

**बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन्॥ २.०३०.०९**

यः। नः- अस्माकम्। सनुत्यः- अन्तर्हितः सन्। उत वा- अपि वा। जिघत्नुः- जिघांसुः। अयं शत्रुरस्मच्चित्तस्थाप्रज्ञायां स्थितानां दुर्वासनानां प्रतीकः। तम्। तिगितेन- तीक्ष्णायुधेन। विध्य-

Dr. Rangaji

WEBOLIM

नाशय। बृहस्पते- मेधाधिदैवत। आयुधैः। शत्रून्- रिपून्। जेषि- जयसि। राजन्- स्वामिन्। द्रुहे रीषन्तम्- द्रोहिहिंसकं वज्रम्। परि धेहि- प्रक्षिप ॥९॥

**अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि।**
**ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि॥ २.०३०.१०**

अस्माकेभिः- अस्मदीयैः। सत्वभिः- बलैः। शूरैः- शौर्यसम्पन्नैः। शूर- समर्थ। यानि। ते- त्वया। कर्त्वानि- कर्तव्यानि तानि। वीर्या- वीर्याणि। कृधि- कुरु। ज्योक्- दीर्घकालम्। अनुधूपितासः- धूपायमानहृदयाः। अभूवन्- शत्रवोऽभवन्। हत्वी- तान् हत्वा। नः- अस्माकम्। वसूनि- सम्पदस्तैर्हृताः। आ भर- आहर ॥१०॥

**तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम्।**
**यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे॥ २.०३०.११**

यथा। दिवेदिवे- प्रतिदिनम्। अपत्यसाचम्- सधर्मसन्ततिम्। सर्ववीरम्- वीरगणसम्पन्नाम्। श्रुत्यम्- श्रुतिमयीम्। रयिम्- दानयोग्यसम्पदम्। नशामहै- व्याप्नवाम। तथा। तम्। वः- युष्माकम्। मारुतंशर्धं- मरुद्गणं प्राणगणम्। दैव्यं जनम्- दिव्यम्। नमसा- नमस्कारेण। गिरा- मन्त्रेण। सुम्नयुः- सुखकामः सन्। उप ब्रुवे- स्तौमि ॥११॥

Dr. Rangaji
WEBOLIM